# संस्कृत-वार्ता:

**दिनाङ्क :-18.06.2024**

**प्रात: - 06:55**

## अथ वार्ता:

### प्रधानमन्त्री-उत्तरप्रदेश-बिहार:

प्रधानमन्त्री नरेन्द्रमोदी अद्यारभ्य द्वि-दिवसीय उत्तरप्रदेश-बिहारयो: यात्रायां भविष्यति। प्रधानमन्त्री नरेन्द्रमोदी अद्य उत्तरप्रदेशस्य वाराणसीनगर्यां प्रधानमन्त्री-किसान-सम्मान-निधि-योजनान्तर्गतं विंशति-सहस्र-कोटि-रुप्यकाणां सप्तदशतमं देयराशिं प्रसारयिष्यति। देयराशे: धनं प्रत्यक्षतया षड्विंशति-लक्षाधिक-नव-कोटि: लाभार्थि-कृषकाणां वित्तकोषेषु सम्प्रेषयिष्यते। एतस्मिन् कार्यक्रमावधौ श्रीमोदी स्वयं-साहाय्य-समूहानां त्रिंशत्सहस्राधिकाभ्य: महिलाभ्य: कृषि-सखी-इत्यस्यान्तर्गतं प्रमाणपत्राण्यपि वितरिष्यति। अद्य सायं श्रीमोदी दशाश्वमेध-घट्टे गङ्गा-आरार्तिक्यां समुपस्थितो भविष्यति तदनन्तरं काशी-विश्वनाथ-देवालये पूजां दर्शनञ्च करिष्यति। श्व: प्रात: प्रधानमन्त्री नालन्दाया: भग्नावशेषाणाम् अवलोकनार्थं तत्र गमिष्यति। एतदनन्तरं असौ बिहारस्य राजगीर-स्थले नालन्दा-विश्वविद्यालयपरिसरस्यापि उद्घाटनं विधास्यति। अत्रावसरे जनसभां एकामपि सम्बोधयिष्यति

### बङ्गाल-रेलदुर्घटना

पश्चिम-बङ्गाले दुरापादितायां रेल-दुर्घटनायां नव जनाः मृत्युमुपगताः। रेलवे बोर्ड इत्यस्य अध्यक्षा जया वर्मा राजधान्यां नवदिल्यां वार्ताहर-सम्मेलने उक्तवती यत् साहाय्योद्धार-कार्यं सम्पन्नम्। अस्यां दुर्घटनायाम् आहत्य षष्ठी जनाः व्रणिताः। प्रधानमन्त्रिणा नरेन्द्रमोदिना रेल-दुर्घटनायां गभीरं दुःखं प्रकटितम्। सामाजिक-सञ्चार-पटले प्रधानमन्त्री अलिखत् यत् पश्चिम-बङ्गाले दुरापादिता रेल-दुर्घटना दुखावहा विद्यते। अमुना मृतकाणां परिजनान् प्रति संवेदना व्यक्तीकृता। प्रधानमन्त्रिणा व्रणितानां शीघ्र-स्वस्थ-लाभस्य कामना कृता। श्रीमोदिना रेल-विभागस्य अधिकारिभिः सह संवादं विधाय स्थितिः परिज्ञाता। रेलमन्त्री अश्विनी वैष्णवः घटनास्थलं सम्प्राप्य अवोचत् यत् प्रधानमन्त्री राष्ट्रिय-साहाय्य-कोषात् प्रत्येकं मृतकस्य परिजनेभ्यः दश-लक्ष-रूप्यकाणाम् प्रत्येकं गभीरतया व्रणितेभ्यः सार्ध-द्वि-लक्ष-रूप्यकाणाम् अथ च प्रत्येकं सामान्यतया व्रणितेभ्यः च पञ्चाशत् सहस्ररूप्यकाणि प्रदास्यन्ते। अत्रान्तरे राष्ट्रपतिः द्रौपदी मुर्मुः रेलदुर्घटनायां दुःखं प्रकटितवती। एकस्मिन् सामाजिक-सञ्चार-पटले तया लिखितं यत् रेलदुर्घटनायां जनहानिः कष्टप्रदा विद्यते।

### शाह:-मणिपुर:

केन्द्रीयगृहमन्त्री अमितशाहः उक्तवान् यत् मणिपुरे सर्वेषां नागरिकानां सुरक्षां सुनिश्चेतुं केन्द्रसर्वकारः पूर्णतया प्रतिबद्धः अस्ति। केन्द्रीयगृहमन्त्री अमितशाह: ह्य: नवदिल्लयां मणिपुरसुरक्षास्थितिं समीक्षितुं उच्चस्तरीयोपवेशनस्य अध्यक्षताम् अकरोत्। केन्द्रीय-गृहसचिव: अजयभल्ला: आसूचनाभिकरणप्रमुख: तपनडेका थलसेनाध्यक्ष: जनरल मनोजपाण्डे: मणिपुरस्य आरक्षि-महानिदेशक: राजीव-सिंह: अन्ये च वरिष्ठाधिकारिण: उपवेशनेऽस्मिन् सम्मिलिता: अभवन्। परह्य: केन्द्रीय-गृहमन्त्रिणा अमितशाहेन जम्मू-कश्मीरस्य सुरक्षास्थितिं अथ च अमरनाथयात्राया: सज्जतां समीक्षितुं एकमुच्चस्तरीयोपवशनं विहितम्।

**इजरायल-प्रधानमन्त्री**

इजरायलदेशीयेन प्रधानमन्त्रिणा बेन्जामिन नेतन्याहू इत्यनेन केन्द्रवादीन: विपक्षनेतु : बेन्नी गैन्जस्य तस्य च सहयोगीदलस्य गादी आइसेन्कोटस्य त्यागपत्रप्रदानस्य एकसप्ताहस्य अपि न्यूनकालानन्तरं स्वकीयस्य षड्सदस्यीययुद्धमन्त्रिमण्डलस्य विघटनं कृतवान्। वार्ता प्रवाहिकानुसारं गजा-क्षेत्रे हमास-सङ्घस्य युद्धस्य विषये संवेदनशीलविषयेषु अधुना लघुमञ्चे चर्चा भविष्यति। इजरायल रक्षासेनायाः प्रवक्ता अवदत् यत् एतेन आज्ञाशृङ्खला प्रभाविता न भविष्यति। ध्येयं वर्तते यत् अक्टोबर्-मासस्य सप्तमे दिनाङ्के दक्षिण-इजरायल-देशे अपूर्व-आक्रमणस्य प्रतिक्रियारूपेण इजरायल-सैन्येन गजा-नगरे हमास-सङ्घं विनाशार्थं अभियानं प्रारब्धम्।

**।।इति वार्ता:।।**